योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ५२

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

कदाचिदथ मार्गेण तेन कैलासवासिनीम् ।

अहं स्नातुमदृश्यात्मा व्योमवीथीगतोऽगमम् ।। १

निर्गत्य नभसः सप्तमुनिमण्डलकोटरात् ।

रात्रौ प्राप्तोऽस्मि सुमते दाशूरतरुमुन्नतम् ।। २

यावच्छृणोमि विटपकुहरात्कानने वचः ।

कुड्मलाम्भोजलग्नस्य षट्पदस्येव निःस्वनम् ।। ३

शृणु पुत्र महाबुद्धे वस्तुतोऽस्य समामिमाम् ।

वर्णयामि महाश्चर्यामेकामाख्यायिकां तव ।। ४

अस्ति राजा महावीर्यो विख्यातो भुवनत्रये ।

नाम्ना खोत्थ इति श्रीमाञ्जगदाक्रमणक्षमः ।। ५

अस्यानुशासनं सर्वे भुवनेष्वपि नायकाः ।

शिरोभिर्धारयन्त्युच्चैश्चूडामणिमिवार्थिनः ।। ५

यः साहसैकरसिको नानाश्चर्यविहारवान् ।

केनचित्त्रिषु लोकेषु न महात्मा वशीकृतः ।। ७

यस्यारम्भसहस्राणि सुखदुःखप्रदान्यलम् ।

संख्यातुं केन शक्यन्ते कल्लोला जलधेरिव ।। ८

यस्य वीर्यं सुवीर्यस्य न शस्त्रैर्न च पावकैः ।

केनचिद्भुवने क्रान्तमाकाशमिव मुष्टिना ।। ९

यदीयां विततारम्भां लीलां निर्माणभासुराम् ।

न मनागनुवर्तन्ते शक्रोपेन्द्रहरा अपि ।। १०

त्रयस्तस्य महाबाहो देहा विहरणक्षमाः ।

जगदाक्रम्य तिष्ठन्ति ह्युत्तमाधममध्यमाः ।। ११

व्योमन्येवातिवितते जातोऽसौ त्रिशरीरकः ।

तत्रैव च स्थितिं यातः शब्दपातश्च पक्षिवत् ।। १२

तत्रैवापारगगने नगरं तेन निर्मितम् ।

चतुर्दशमहारथ्यं विभागत्रयभूषितम् ।। १३

वनोपवनमालाढ्यं क्रीडाशिखरिसुन्दरम् ।

मुक्तालताविवलितवापीसप्तकभूषितम् ।। १४

शीतलोष्णात्मकाक्षीणदीपद्वयविराजितम् ।

ऊर्ध्वाधोगतिरूपेण वणिङ्मार्गेण संकुलम् ।। १५

तस्मिन्नेवातिविपुले पत्तने तेन भूभृता ।

संसारिणो विरचिता मुग्धापवरका गणाः ।। १६

ऊर्ध्वं केचिदधः केचित्केचिन्मध्ये नियोजिताः ।

केचिच्चिरेण नश्यन्त केचिच्छीघ्रविनाशिनः ।। १७

असितच्छादनच्छन्ना नवद्वारविभूषिताः ।

अनारतवहद्वाता बहुवातायनान्विताः ।। १८

दीपपञ्चकसालोकास्त्रिस्थूणाः शुक्लदारवः ।

मसृणालेपमृदवः प्रतोलीभुजसंकुलाः ।। १९

मायया रचितास्तेन राज्ञा तेषु महात्मना ।

रक्षितारो महायक्षा नित्यमालोकभीरवः ।। २०

अथापवरकौघेषु चलत्सु स महीपतिः ।

करोति विविधां क्रीडां नीडेष्विव विहङ्गमः ।। २१

त्रिशरीरशतेष्वन्तस्तैर्यक्षैः सह पुत्रक ।

लीलावशमुषित्वा तु पुनर्निर्गम्य गच्छति ।। २२

तस्येच्छा जायते वत्स कदाचिच्चलचेतसः ।

पुरं भविष्यन्निर्माणं किंचिद्यामीति निश्चला ।। २३

भूताविष्ट इवावेगात्तत उत्थाय धावति ।

पुरं तदप्यथाप्नोति गन्धर्वैरिव निर्मितम् ।। २४

तस्येच्छा जायते पुत्र कदाचिच्चलचेतसः ।

विनाशं संप्रयामीति तेनाशु स विनश्यति ।। २५

पुनरुत्पद्यते तूर्णं स्वात्मनोर्मिरिवाम्भसः ।

व्यवहारं तनोत्युच्चैः पुनरारम्भमन्थरम् ।। २६

स्वयैव व्यवहृत्याथ कदाचित्परिभूयते ।

किंकरोस्म्यहमज्ञोऽस्मि दुःखितोऽस्मीति शोचति ।।

मुदमेत्य कदाचिच्च स्वयमायाति दीनताम् ।

प्रावृड्वर्षकलोल्लासपूरादिव नदीरयः ।। २८

जयति गच्छति वल्गति जृम्भते

स्फुरति भाति न भाति च भासुरः ।

सुत महामहिमा स महीपतिः

पतिरपामिएव वातरयाकुलः ।। २९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० स्थितिप्रकरणे दाशूरो० खोत्थविभववर्णनं नाम द्विपञ्चाशः सर्गः ।। ५२ ।।